**संस्कृत-वार्ता:**

**दिनाङ्क :-12.10.2024**

**प्रात: - 06:55**

**प्रधानमन्त्री**

प्रधानमन्त्री नरेन्द्र मोदी अब्रवीत् यत् भारतस्य एक्ट-ईस्ट इत्येषा प्रतिवेशि–प्रथम-नीति: आसियान-देशीय-संबंधान् नूतनाम् ऊर्जां, गतिं दिशां च अयच्छत्। तेन सबलं प्रतिपादितं यत् एकविंशी शताब्दी भारतस्य आसियान-देशानां च अस्ति। लाओ-राजधान्यां वियंचने भारतासियान-शिखर-सम्मेलने प्रधानमन्त्री अवदत् भारतम् आसियान-देशा: च शान्तिप्रिय-राष्ट्राणि सन्ति। अपि च, एतानि परस्परम् अखण्डताया: संप्रभुताया: च सम्मानं कुर्वन्ति। प्रधानमंत्री अवोचत् यत् यदा विश्वे अनेकेषु भागेषु साम्प्रतम् आपीड-मतभेदादिकं दृश्यते, तदा भारतासियान देशेषु मित्रता-सहयोग-संवाद-सहभागिता: अतितरां महत्तवपूर्णा: सन्ति। श्री मोदी प्रावोचत् यत् विगतेषु दश-वर्षेषु आसियान-देशै: सह भारतस्य व्यापार: संवर्ध्य द्विगुणित: अर्थात् त्रयोदश-कोटि-डॉलरत: अधिक: संवृत्त:। एतद् अतिरिच्य, अत्र सम्मेलने प्रधानमन्त्री विभिन्नै: आसियान-नेतृभि: समम् अपि द्वि-पाक्षिक-चर्चाम् अकरोत्। भारत-लाओ पीडीआ इत्येतयो: षट् सहमिति: पत्राणां संधौ हस्ताक्षरं जातम्। भारत-संयुक्त राष्ट्र विकास साहय्य कोष माध्यमेन लाओ इत्यत्र पोषण सुरक्षायां परिष्काराय मिलियन अमेरिका डॉलर इत्यस्यवित्तीय सहायता प्रदानार्थं निर्णयं स्वीकृतम्।

**विजयदशमी पर्व**

अद्य देशे सर्वत्र विजयदशमी-दशहरा उत्सवः आचर्यते। भगवतः श्रीरामस्य रावणोपरि विजयस्य स्मरणे अयं उत्सवः आचर्यते। अस्मिन् दिने नवरात्रि-दुर्गापूजायाः समापनम् अपि भवति। अत्रावसरे राष्ट्रपतिः द्रौपदी मुर्मुः देशवासिभ्यः शुभकामनाः प्रदत्तवती।

**लेबनान्-देशस्य स्थितिं प्रति भारतं चिन्तां प्रकटयति।**

विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत्, "नवदेहली निरन्तरं लेबनान स्थितिं निरीक्षमाणः अस्ति, ब्लू लाइन इत्यस्य पार्श्वे क्षीणतायाः सुरक्षा-स्थित्याः विषये च चिन्तितः अस्ति"। मन्त्रालयः अवदत् यत् "संयुक्तराष्ट्रसङ्घस्य परिसरस्य अखण्डतायाः सर्वैः आदरः कर्तव्यः, संयुक्तराष्ट्रसङ्घस्य शान्तिरक्षकाणां सुरक्षायै, तेषां अधिकारस्य पवित्रतायै च समुचितानि उपायानि कर्तव्यानि" इति।

**एयरइंडिया-वायुयानम्**

तमिलनाडुराज्यस्य त्रिचीनगरस्य अन्ताराष्ट्रीयविमानपत्तनात् ह्य: संयुक्तारबामीरातदेशस्य शारजहाँनगरं प्रति गच्छतो वायुयानस्य सफलम् आपत्कालीनावतरणं जातम्। उक्तविमानस्य हाइड्रोलिक-प्रणाल्यां तकनीकी-विफलतायाः परिज्ञानानन्तरं त्वरितं त्रिचीविमानपत्तने एव विमानस्य सुरक्षितम् आकस्मिकं अवतरणं कारितम्। विमानेऽस्मिन् चतु: पंचाशत् अधिकैक शतं यावत् जनाः आसन्। आकस्मिकावतरणात् पूर्वं विमानमिदं सार्धद्विहोरापर्यन्तं आकाशे एवं उड्डीयमानम् आसीत्। आकस्मिकावतरणे त्रिचीविमानपत्तने उच्चसजगता आसीत्। सर्वाण्यपि रक्षणसंसाधनानि स्थापितानि आसन्। आकस्मिकावतरणस्य कृते बेली-अवतरणस्य विकल्पमपि स्थापितमासीत्। ध्यातव्यमस्ति यत् विमानचालकसमूहस्य विवेकेन अस्य विमानस्य सुरक्षितम् आकस्मिकम् अवतरणं जातम्।

**महिला- टी-20**

महिलानां-विंशतिः प्रतिविंशतिः विश्व-चषक-क्रिकेट-प्रतिस्पर्धायां गतसायं दुबई-नगरस्य दुबई-अन्तर्राष्ट्रीय-क्रिकेट-क्रीडाङगणे ऑस्ट्रेलिया-दलं पाकिस्तान-दलं नव स्तोभैः पराजितम्।

**संस्कृत-साप्ताहिकी**

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक- वादनतः भविष्यति। कृपया श्रृण्वन्तु।

**।।इति वार्ताः।।**